क्र. नं. ७

# अमरकोश सटीक

अंशतः

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

॥अथामरकोशसटीक प्रथमकांड प्रारंभः रामजयराम॥

श्रीगणेशाय नमः ॥ सच्चिदानंदरूपाय रामायामिततेजसे ॥ नमस्कुरोमि सततं पञ्चाशीसूदनाय हे ॥१॥ वंदे तं प ॥ कां० १ टि
रमानंदं वामाधेनेऽमयायुतं ॥ रक्षोभुजंगवधत्र विवरीवसते जगत् ॥२॥ इह खलु श्रीमदमरसिंहश्चिकी
र्षितस्य नामलिंगानुशासनस्य निर्विघ्नपरिसमाप्त्यर्थं कृतं मंगलं ग्रंथादौ शिष्यशिक्षार्थं निबध्नाति ॥ यस्ये
ति ॥ भो धीराः ॥ अगाधस्यातिगंभीरस्य ज्ञानकरुणयोः समुद्रस्य यस्य अनघा निर्मलाः गुणाः शौर्यादयः
(२) संति सोऽक्षयः श्रिये संपत्तये अमृताय मोक्षार्थं च सेव्यतां आराध्यतां ॥१॥ चिकीर्षितं प्रतिजानीते ॥ समाहृत्येति ॥
अन्येषां तंत्राणि शास्त्रांतराणि नामलिंगानुशासनानि ॥ समाहृत्य एकत्र कृत्वा संक्षिप्तैः अल्पविस्तारैः बह्वर्थैः प्रति
५५ तिसंस्कृतैः प्रतिपदं प्रकृतिप्रत्ययविचारेण कृतसंस्कारैः वर्गैः सजातीयैः समूहैः संपूर्णं सांगोपांगं नाम्नां स्वरिसा
दीनां च स्त्रीपुंनपुंसकाख्यानां अनुशासनं व्युत्पादकं शास्त्रमुच्यते ॥ मयेति शेषः ॥२॥ अथ वक्ष्यमाणशास्त्रस्य
तावत्परिभाषामाह त्रिभिः श्लोकैः प्रायश इति ॥ अत्र प्रायशःशब्दः ... रूपभेदेन आकारविशेषेण स्त्रीपुंनपुंसकं
ज्ञेयं ॥ यथा लक्ष्मीः पद्मालया पद्मा ॥ पिनाकोऽजगवं धनुः ॥ तथा कुत्रचित् साहचर्यात् ... रसा ... ध्यात् लिंगं ज्ञेयं ॥ य ॥१॥
यथा ॥ अश्वयुगश्विनी ॥ ब्रह्मात्मभूः सुरज्येष्ठः ॥ वियद्विष्णुपदं ॥ अत्र संदिग्धानि अश्वयुब्रह्मवियंति ॥ अश्वि

(2A)

स

न्यात्मभूर्विष्णुपदं साहचर्यात्स्त्रीपुंनपुंसकलिंगानि ॥ तथा क्वचित्तद्विशेषविधेः लिंगविशेषोक्तेः ॥ यथा भेरी स्त्री दुंदु
भिः पुमान् ॥ क्लीबं त्रिविष्टपं ॥ २ ॥ भेदेति ॥ अत्रास्मिन्ग्रंथे ऽनुक्तानामप्युसादितानां भिन्नलिंगानामसमानलिंगा
नां नाम्नां भेदाख्यानाय लिंगभेदमाख्यातुं द्वंद्वो न कृतः यथा कुलिशं भिदुरं पविः ॥ न तु कुलिशभिदुरपवय इति ॥ तथै
कशेषोपि समासो न कृतः शिष्यमाणलिंगस्यैव प्रतीतेः ॥ यथा नभः खं श्रावणो नभाः न तु खं श्रावणो नभसी इति
तथा संकरोपि मिश्रीभावोपि न कृतः साहचर्येण लिंगानिश्चयप्रसंगात् ॥ स्तवः स्तोत्रं स्तुतिर्नुतिः ॥ न तु यथा
स्तुतिः स्तोत्रं स्तवो नुतिरिति ॥ अत्रानुक्तानामित्युक्तेः ॥ प्रायशोरूपभेदेनेत्युक्तरीत्या येषां लिंगं व्युसादितं ते धु
षामेव भिन्नलिंगानामपि स्थलांतरे द्वंद्वादयः कृताः ॥ तेच क्रमाद्दते क्रमं विना न कृताः यत्र संग्रहश्लोकादौ
क्रममात्रं विवक्षितं न तु व्युसादनं तत्रैव कृता इत्यर्थः ॥ यथा स्वर्गः पृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिः विद्या
धराप्सरोयक्षरक्षाद्यिच ॥ अत्र द्वंद्वसंकरौ । अत्रादावेकशेषश्च कृतः ॥ ७ ॥ त्रिलिंग्यामिति ॥ त्रिलिंग्यां लिंगत्रयस्या
पियोगे त्रिष्विति पदमुक्तं ॥ यथा त्रिषु स्फुलिंगोग्निकणः ॥ स्फुलिंगशब्दो लिंगत्रयेपि वर्तत इत्यर्थः ॥ तथा मिथुने स्त्रीपुंस पि
योर्द्वयोरिति पदं ॥ यथा वेरुद्वयोर्ज्वालकीलौ ॥ तथा निषिद्धलिंगं शेषार्थं यत्र लिंगं निषिद्धं तत्र तदवशिष्टं लिंगं ज्ञे

यं॥यथाव्योमयानं विमानोऽस्त्री सत्र स्त्रीलिंगो न निषिध्येव विमानस्य पुंनपुंसकविधिः॥तथा तु शब्दः अंतो यस्य तात्वं को। १
तं॥अथशब्दः आदिर्यस्य तद्यथादिद्वंद्वं यं पूर्वभाक् न भवति। पूर्वेण न संबध्यते तथा पुलोमजा शची इन्द्राणी न
गरीक्षमरावती यत्र नगरीति वंतं पदद्वंद्वं द्राण्या न संबध्यते किंतु अमरावत्या संबध्नं॥तथा नित्यानवरता जस्र
मप्यथातिञ्चयो भरद्वयथादिपदं न पूर्वभाक्। किंतु भरस्य पर्यायः॥५॥स्वरिति॥स्वः स्वर्गः। नाकः। त्रिदिवः॥
(3) त्रिदशालयः। सुरलोकः। द्यौः। द्यो। त्रिविष्टपं इति नवनामानि स्वर्गस्य॥तत्र स्वरित्यव्ययं त्रिलिंग्यां सर्ववि
य भक्तिषु सर्ववचनेषु सममित्यर्थः॥द्यो दिवौ द्वे स्त्रीलिंगे धोर्गावपद्य॥द्योः दिवौ दिवः द्युभ्यामित्यादिपरः॥त्रिवि
ष्टपं क्लीबं नपुंसके एवं त्रिदशालयादयः सुरसदना द्युलोक उपलक्षणानि॥एवमुत्तरत्रापि अर्थसाम्येन पर्या
यांतराणि स्वयमूह्यानि॥६॥अमराः। निर्जराः। देवाः। त्रिदशाः। विबुधाः। सुराः। सुपर्वाणः। सुमनसः।
त्रिदिवेशाः। दिवौकसः॥ दिवोकसः॥७॥आदितेयाः। दिविषदः। लेखाः। अदितिनंदनाः। आदित्याः। ऋभवः।
अस्वप्नाः। अमर्त्याः। अमृतांधसः।८॥बर्हिर्मुखाः। क्रतुभुजः। गीर्वाणाः। गीर्बाणाः। दानवारयः। वृंदारकाः।
दैवतानि। देवताः॥इति षड्विंशतिनामानि देवानां॥ व्यक्तिबाहुल्याद्बहुवचनप्रयोगः॥विकल्पेन दैवतशब्दः पुंसि॥ २
यथा दैवतमिदं दैवतोयमिति। देव एव देवता स्वार्थे तल्॥९॥असंघचारिण आह॥आदित्येति॥आदित्या द्वादश।

(3A)

बहवोनीरायत्रतस्मिंन्देशेतदस्मिंनस्तीथेंकुमुदनडवेतसेभ्योड्मतुप्॥९॥शादैर्बालतृणैर्हरितेदेशेशा
द्वलइत्येकं॥शादाःसंत्यस्मिन्शाद्वलः॥सजंबालःकर्दमयुक्तेदेशेपंकिलइत्येकं।जलप्रायं।अनूपं।द्वेज
लबहुलदेशस्य॥अनुगताआपोऽत्रअनूपंतथाविधःअनूपसदृशःकश्चिंनद्यारेलपातदेशःकच्छइत्यु॥
च्यते॥एकंकच्छशब्दस्यपुंसिस्थितावन्येषांविश्लिष्टिपूर्वोक्तसवाधनार्थः॥कच्छइत्यनूपस्यैवपर्यायइति
केचित्।''कच्छ।कच्छमनूपमितिबोपालितः॥''॥१०॥शर्करा।शर्करिलः।द्वेवालुकायुक्तेदेशे।तत्रशर्क
रास्त्री।शार्करः।शर्करावान्।द्वेवालुकायुक्तस्यदेशस्य।आद्योशर्कराशार्करिलौदेशेएव।देशोऽभि
लेच्चोचेतिनियमात्।एकंसिकतावसुंनेयाउहन्नीयाःतथाग्रह।सिकताःसिकतिलइति।द्वेसिकतायु
क्तदेशस्य।सैकतः।सिकतावान्।द्वेवालुकायुक्तस्यदेशस्य।तत्रसिकतानित्यंस्त्रियांबहुत्वेच।''अत्र
शर्करासिकताशब्दौद्वावपिबहुवचनांतावितिकेचित्॥''॥१२॥देशइति।नद्यंबुभिःवृष्ट्यंबुभिश्चसं
पन्नैर्व्रीहिभिःपालितोदेशःक्रमेणनदीमातृकोदेवमातृकश्चस्यात्॥नद्यंबुजातसस्यपालितोनदीमा

अ०प्र०८ तकः ॥ दस्युं वु जातसस्याधिते । वमात् क इत्यर्थः ॥ एकैकं ॥ १२ ॥ धर्मशीलः शोभनो राजा यस्य स राजात कां०२
३ स्मिं देशे राजन्वान् ॥ एकं । ततोन्यत्र राजमात्रयुक्तो देशो राजवान् ॥ एकं । गोष्ठं । गोस्थानकं । द्वे गावो स्थान
स्य ॥ तद्गोष्ठं भूतपूर्वकं चेत् गोष्ठीनमित्युच्यते । पूर्वं यत्र गाव आसन् तत्स्थानं गोष्ठीनमित्यर्थः ॥ गोष्ठा
दयश्चत्वारः एकं ॥ १३ ॥ पर्यंतभूः । परिसरः । द्वे नदीपर्वतादीनामुपांतभुवः । सेतुः । आलिः । "आली ॥" द्वे सेतोः ॥ "
(५) पूल इति ख्यातस्य ॥" स्त्रीलिंगायामालिः सेतुः पुमानित्यन्वयः ॥ वामलूरः । नाकुः । वल्मीकं । त्रीणि वल्मी
कस्य । अयनं । वर्त्म । मार्गः । अध्वा । पंथाः । "पथः वाटः पथः श्च मार्गश्चेति त्रिकांडशेषः ।" पदवी । "पदविः ॥"
सृतिः । सरणिः । "शरणिः पथि चावल्यामिति तालव्यादिषु जयात्तालव्यादेरपि ॥ बंतोपि ।" पद्धतिः "पद्ध
ती ॥" पद्या वर्तनी । "वर्तनिः वर्त्मनिः । वर्त्मनी । पथनी पथी इति हेमः ।" एकपदी । द्वादश मार्गस्य ॥ १५ ॥ अपंथाः ॥ ति
स्र पंथाः स सथः । त्र यं अर्च्यते ध्वनि शोभने मार्गे । व्यध्वः । दुरध्वः । विपथः । कदध्वा । कापथः । "कुपथोपि ।" पंच
दुर्मार्गस्य ॥ तत्र कदध्वा नान्तः ॥ १६ ॥ अपंथाः । अपथं । द्वे अमार्गस्य ॥ शृंगाटकं । चतुष्पथं । द्वे चवाटा इति ख्यातस्य ॥
दूरः श्वासो शून्यश्च दूरशून्यः छाया जलादि वर्जितो दूरस्थो ध्वा मार्गः प्रांतरमित्युच्यते ॥ एकं । यद्दुर्गमं चोरकंटको २

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai.

युक्तं क्षुपद्रवर्त्ममार्गः कांतारमित्युच्यते ॥ "पुंसि कांतारः। कांतारो स्त्री महारण्ये बिले दुर्गमवर्त्मनीति मेदिनी ॥" एकं ॥
१७ ॥ क्रोशयुगं गव्यूतिरित्युच्यते। क्रोशो धनुःसहस्रद्वे धनुर्हस्तचतुष्टयं। "द्वाभ्यां धनुःसहस्राभ्यां गव्यूतिः पुं
सि भाषितमिति शाश्वतोर्णवात् पुंस्यपि ॥ क्लीबे तु गव्यूतं। धन्वंतरसहस्रं तु क्रोशः। क्रोशद्वयं पुनः ॥ गव्यूतं स्त्री तु गव्यू
तिर्गोरुतं गोमतं च" इति वाचस्पतिः। किष्कूणां हस्तानां चतुःशतः "चतुःशती वा" नल्व इत्युच्यते। चतुःशतहस्त
(4A) मितं स्थानं नल्वसंज्ञकमित्यर्थः। एकं। घंटापथ। संसरणं। द्वे राजपथमात्रस्य। घंटोपलक्षितगजादीनां पथाः।
घंटापथः। "दशधन्वंतरो राजमार्गो घंटापथः स्मृत इति चाणक्यः ॥" तत्संसरणं पुरस्य नगरस्य चेदुपनिष्करमित्य
क्तं। बुधैः संसरणं वर्त्म गजादिनामसंकुलं पुरस्योपस्करं चोक्तमिति भुग्नः ॥ १८ ॥ "द्यावेद्यादि पंच द्विकं च नननामानि
द्यावाभूम्योः। गंजे संदिग्धयंक्षारसमुद्रस्य। गंजा खनौ सुरागृहे। रमासकृतौ वदारेषु विशिष्टलवणाकर इति मेदि
नी ॥ गंजारमे स्त्रियां" अंगापोगापक्षया भूमिरेवाप्रधानमिति भूमिवर्ग इति व्यपदेशः। एवमन्यत्रापि मंत
व्यं ॥ इति भूमिवर्गः ॥ पूः। पुरी। "पुरिः" नगरिः। पत्तनं। "पट्टनं" पुटभेदनं। स्थानीयं। निगमः। सप्तन
गरस्य ॥ पूः पुरौ। पुरीनगर्यौ वा स्त्रियो। पक्षे पुरं नगरं। केचिदत्र भेदं च कुर्युः यथा। यत्रानेकशिल्पिनो नाने
कवणिजो दिव्यवहारस्तासु रादि संज्ञं। यत्र राजा तदनुचराश्च संति तत्पुरं पत्तनादि संज्ञं ॥ यत्र का

आ० टि० रादिवेष्टितं विस्तीर्णं पुरं तत्स्थानीयादिनामकमिति ॥ यन्मूलनगरादन्यत्र तत्संसितं धारवानगरमित्यन्ये ॥ एकं "मू को० २
४ लनगरं राजधानी" ॥१॥ वेश्याजनस्य समाश्रयो निवेशस्थानं वेश इत्युच्यते । एकं "तालव्यांत । न पथ्ये गृहमात्रे
च वेशो वेश्यागृहेपि चेति तालव्यां रभसः ॥ गृहमात्रे गणिकायाः सद्मवेशो भवेत्तु गालव्यः । तालव्यो मूर्धन्यो व
ले करणकथितः आचार्यैरित्यूष्मविवेकः ॥" आपणः । निषद्या । द्रव्यव्यवस्तुशालायाः ॥ हट्टवणिक्पथपण्याजिरादि
(5) कमपि । विपणिः । "विपणी ॥" पण्यवीथिका । द्रव्यव्यवस्तुशालापंक्तेः । चत्वार्यपि हट्टस्य सन्त्ये । विपणिः स्त्री । आपणादिद्वयं
हट्टस्य बाजार इति प्रसिद्धस्य ॥ विपणी तद्द्वयं । हट्टहट्टस्य विक्रियस्थानस्येत्यपि मतं ॥२॥ रथ्या । प्रतोली । विशिखा ।
त्रीणि ग्रामाभ्यंतरमार्गस्य । चयः । वप्रः । द्वे परिखोद्धृतमृत्तिकाकूटस्य ॥ "प्राकाराधारस्य वा ।" प्रकारः । वरणः । सालः ।
"शालः । तालव्यान्तः पञ्चषयोः शालो वृक्षे द्रुतोद्भेदे च । तालव्यादस्य उक्तस्तथा स्त्रियां वृक्षजायामित्यूष्मविवेकः । सालो व
रणसर्जयोरिति रभसः ॥" त्रयं यष्टिकाकंटकादिरचितवेष्टनस्य । नगरादेः प्रांतभागे यावृत्तिः वेष्टनवेणुकंटकादीनां सा प्रा
चीनामित्युच्यते "प्राचीरमित्यपि" एकं ॥३॥ भित्तिः । कुड्यं द्वे भित्तेः । तत्कुड्यं अंतर्न्यस्तकीकसं चेदेडूकं स्यात् "एडूकं एडू
कं भवेदेडूकमेडूकं भित्तिद्विरूपकोशः ॥" एकं । अंतर्न्यस्तानि कीकसानि अस्थीनि दार्ढ्यार्थं यत्र तत् । कीकसं कठिनद्र
व्यस्यापलक्षणं ॥ गृहं । गेहं । उदवसितं । वेश्म । सद्म । निकेतनं । निशान्तं । पस्त्यं "वस्त्यं । वसतिः । तत्र साधुरिति यत् ॥" स
दनं । सादनं । सदनं सादनं समं भित्तिद्विरूपकोशः ॥" भवनं । अगारं । "आगारं । विद्यादगारमागारमपगामापगामपी ४

तोद्धि रूपको शः॥" मंदिरं। गृहाः। निकाय्यः। निलयः। आलयः। षोडश गृहस्य॥ तत्र गृहाः पुंसि बहुत्वे च निसं॥"
पा क्लीबेपि॥५॥ वासः॥ कुटी। शाला। सभा। चत्वारि सभागृहस्य। तत्र कुटो द्वयोः स्त्रियां तु कुटी कुटिश्च॥" कु
टः कोटः पुमान स्त्री घटे स्त्रीपुंसयोर्गृहे इति मेदिनी॥ गृहादि सभांतानि विंशतिर्नामानि गृहस्य॥ सं
(5A) जवनं। चतुःशालं। द्वे अन्योन्याभिमुखशालाचतुष्कस्य॥ "चौसोपी चोपट चौक इति प्रसिद्धस्य॥७॥ पर्ण
शाला। उटजः। द्वे मुनिगृहस्य॥ "उटजः स्त्रण पर्णादिरचित दृढीकोशः॥७॥ धा चैत्यं। आयतनं। द्वे यज्ञायतन
भेदस्य। वाजिशाला। मंदुरा। द्वे अश्वशालायाः॥ "नागारेति रव्यातायाः॥ आवेशनं। शिल्पिशाला॥ "शि
ल्पशालेत्यपि पाठः॥ तत्र शिल्पस्य शालेति॥ द्वे स्वर्णकारादीनां शालायाः। प्रपा। पानीयशालिका। द्वे जलशा
लायाः॥ पाणपोही इति प्रसिद्धायाः॥७॥ छात्रादिनिलयः। शिष्यादीनां गृहं मठ इत्युच्यते॥ "छात्रां गैवास्या
दिर्येषां परिव्राजकक्षपणकादीनां तेषां निलय इति वा॥ आदिना कापालिकादिसंग्रहः॥ गंजा। द्वे द्रव्य
मध्यस्थानस्य। गर्भागारं। वासगृहं। द्वे गृहमध्यभागस्य॥ अरिष्टं। सूतिकागृहं॥ "सूतकादीनां वर्तिवि
कल्पात् सूतिकागृहं॥ द्वे प्रसवस्थानस्य॥ "वत्ता रोपपर्याया इत्यन्ये या पाषाणादिनिबद्धभूः स कुट्टिमः

The Rajawade Sanshodhan Mandal, Dhule and the Yeshwantrao Chavan Pratishthan, Mumbai joint project

अटी० त्येकं। भूमिगृहं तलघर इति प्रसिद्धस्य। चंद्रादिद्वयं गृहोपरितमगृहस्य उपरमाडी अटाळी इत्यादि प्रसिद्ध
५ स्य।" वातायनं। गवाक्षः। द्वे गवाक्षस्य। सुराकूड इति प्रसिद्धस्य। मंडपः। जनाश्रयः। द्वे मंडपस्य। कै तु मंडपः क्लीब कां० २
पुंसोः। धनिनां धनवतां वासः गृह तात् हर्म्यादि। आदिना स्वस्तिकादालिका ... हः। देवानां राज्ञां च गृहं प्रासा
दइत्येकं॥ ९॥ सौधः। राजसदनं। उपकार्या। उपकारिका। चत्वारि राजगृहस्य। स्वस्तिकादयः ईश्वरसद्मनां रा
(6) जगृहाणां प्रभेदाः स्युः। तत्र चतुर्द्वारितोरणः स्वस्तिकः। उपर्युपरिगृहं सर्वतोभद्रः। ... तिर्नंद्यावर्तः ॥१०॥
विस्तीर्ण ... द्वारो विच्छंदकः। "विच्छंदकः।" आदिना रुचकवर्धमानादयः ... हः। भूभुजां राज्ञां स्त्र्यगारं स्त्रीगृहं तत् अं
८ तःपुरं। अवरोधनं॥ ११॥ शुद्धांतः। अवरोधः। आ ... क्षौमं "क्षौमं" द्वे हर्म्यादिपृष्ठस्य। "उपरिगृहस्य मा
आलिंदः। डी इत्यादि प्रसिद्धस्य।" गृहावग्रहणस्य एकं प्रघाणः। प्रघणः। अलिंदः। ... आलिंदः प्रघाण प्रघण "आलिंदः
स्तथेत्यमरमाला।" त्रीणि द्वाराद्बहिः ... प्रकोष्ठक ... द्वारप्रकोष्ठा बहिर्द्वाराग्रवर्तिचतुष्कस्येति वा।" १२५
गृहावग्रहणी देहली। द्वे गृहद्वाराधोभागस्य। उंबरा इति प्रसिद्धस्य।" देहं गोमयाद्युपलेपं लाति गृह्णाति
त्वात् ... द्वाराधोभागस्य। उंबरवोटा उंबरठा इति ख्यातस्य। "अंगणं।" अंगनं। अंगनं प्रांगणं यानेकामे
न्यामेगन्नामतेति नं तवर्गो विश्वः।" चत्वरं। अजिरं। त्रीणि प्रांगणस्य॥ शिल्पेयेकं द्वारस्याधःस्थितका ५

घस्य।“शिळी। तळहारु शिळीया बिंनासाहारु ध्रु मस्य यदितिबोपाल्लिताता॥”भासेलेके“दंसां“द्वारस्तंभोप
रिस्थितास्यदारुण:“साकपट्टीगणेशपटीइति प्रसिध स्य॥”१३॥प्रछंनं अतर्द्वारं द्वेगुसद्वारस्य खिडकीसंज्ञ
कस्य।पक्षद्वारं।पक्षकं द्वे पार्श्वद्वारस्या“प्रछंनमंतर्द्वारं स्यात्पक्षद्वारं तदुच्यत इति कात्यात् पक्षद्वारं पूर्वान्वयी
(6A) सन्ये॥”वलीकं।“वलीकः पटलप्रांत इतिबोपालितात्पुंसापि॥”नीध्रं द्वे पटलप्रांतो गृहछादनस्य।“नभेतिबाह
भागीयस्य वळचणपडवी इति ख्यातस्य॥”पटलं छादिः द्वे छादनस्य।न्याकार इति प्रसिधस्य॥छादिः स्त्रीति स्त्रि
यां।छदिषो॥१४॥गोपानसी वलभी“वलभिः वडभी तेमूर्धन्यमध्योपि।शुधांतवडभी चंद्रशालेसैधो
ध्ववेश्मनीतिरभसः।ओकोगृहं पिटं चालोवडभी चंद्रशालिकेति त्रिकांडशेषः॥द्वे छादनार्थयद्वक्रदारु तत्र।
पटलाधारभूतवक्रकाष्ठ इत्यर्थः।“पटलाधारवंशपंजरस्य ओमणकडणीबोसा इति प्रसिधस्य।सज्ञा
इति प्रसिधस्य॥कपोतपालिका॥विटंकं।द्वे सौधादौ काष्ठादिरचित पक्षिगृहस्य॥१५॥द्वाः द्वारं प्रतीहारः।
प्रतिहारः॥”त्रयं द्वारस्य।तत्र द्वाः स्त्रियां रेफांता।“वितर्दिः“वितर्दी॥”वेदिका।द्वे वेद्याः॥“अंगणादिषु कृ
तस्यापवेशस्थानस्येति वा॥”वितर्दिः स्त्री।तोरणः।बहिर्द्वारं।द्वे तोरणस्य।“द्वारबाह्यभागस्य॥”पुरद्वारं गो

अ०टी० पुरं।द्वेन गरद्वारस्य॥१६॥पूर्द्वारिन गरद्वारे स्रू खेना वृतारणार्थं॥कमनिन्मं॥यन्म तू टंच्छि यते तत्या हस्तिन फां०२
खुरलैके॥कपाटोंकवाडश्च कपाटश्चात्रिषु स्या दररं न नेमतवाची स्पातिः।कपाडश्चोररा मेति त्रं कंडश्शे
६ र्षः॥अररं।कवाड इति ख्यातस्य॥तौत्रिषु।तत्रास्त्रियांकपाटी।अररी।गाद्दि कुम्भः।तस्य कपाटस्यावष्टम्भकं
यन्मुसलं तदर्गलमित्युच्यते।तत्स्त्रीनपुंसकयोः।स्त्रियात्वर्गला॥ताद्दिष्कंभ्य र्गलमिति पाठः॥१७॥आरो
(७) हणं।सोपानं द्वे सोपानस्य॥पायरी इति ख्यातस्य।निश्रेणिः॥निश्रेणीरित्युपानि यातःश्रेणिः पंक्तिरस्ये
ति निश्रेणिः।अधिरोहणी।द्वयं निःसरणी॥शिडी इति ख्यातस्य।संमार्जनी।शोधनी।द्वेसारणी॥कोर
स्रूणि॥इति ख्यातस्य।तयासंमार्जन्याक्षिप्य निरस्तो केरइति ख्यातं संकरः॥संकार इति पाठ्यं कर्मणिघ
ञ्॥अवकरः।इति द्वयं॥१८॥मुखं।निःसरणं।द्वेगृहादेर्मुखभूतस्य द्वारप्रदेशस्य॥उसदार पुढील द्वार इति
ख्यातस्य।निःसरत्यनेनेति निःसरणं॥संनिवेशः।निकर्षणं।द्वेसमीचीनवासस्थानस्य॥पुरादौ गृहादिरचना
पारिच्छिन्नदेशस्य सथः॥संवसथः।ग्रामः।द्वेग्रामस्य।वेश्मभूगृहभूमिः।वास्तुरित्युच्यते।एकं।गृहरचनावच्छि ६
नभूमेः।ग्रामांतेग्रामस्य समीपेप्रदेशे उपशल्यं समीत्येकं॥ग्रामेणाग्राममुपशल्यमित्यपिपाठः।तत्र ग्रामस्यांतं
समीपं॥सीमा।सीमा।द्वेग्रामादेर्मर्यादायां॥ग्रामन्त्सीमंनित्याद्रिनिपातात्॥पूर्वानिकारांतां।उत्तराटाबंता॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

उभे द्वे स्त्रियां॥ घोषः॥ आभीरपल्ली॥ "आभीरपल्लिः॥" द्वे गोपाग्रामस्य तद्गृहस्य वा॥ कुटीग्रामकयोः पल्लिरिति शाश्व
तः॥ शबरस्यालयः पक्कणः इत्युच्यते। एकं॥ "भिल्लग्रामस्य॥" शबरो वनचांडालः॥ २०॥ इति पुरवर्गः॥ ॥ महीध्रः॥ शि
(7 A) खरी॥ क्ष्माभृत्॥ अहार्यः॥ धरः॥ पर्वतः॥ अद्रिः॥ गोत्रः॥ गिरिः॥ ग्रावा॥ अचलः॥ शैलः॥ शिलोच्चयः॥ त्रयोदश पर्वतसामान्य
स्य॥ १॥ लोकालोकः॥ चक्रवालः॥ "चक्रवाडः॥" द्वे सप्तद्वीपवत्या भूमेः प्राकारभूते गिरौ॥ त्रिकूटः॥ त्रिककुत्॥ द्वे त्रिकूटाच
लस्य॥ हांतः स्त्रिककुत्॥ अस्तः॥ चरमक्ष्माभृत्॥ द्वे अस्ताचलस्य॥ "सें अथिसेप्यवासितोत्रषुनापश्चिमाचले
ति विश्वमेदिन्यौ॥" उदयः॥ पूर्वपर्वतः॥ द्वे उदयाचलस्य॥ २॥ हिमवान्निषाद्रयः सप्तपर्वतविशेषाः॥ आदिना मल
यश्चित्रकूटमंदरादयः॥ एकैकं॥ "ऋक्षपरियात्रिक॥ पारिपात्रक इत्यपि पाठः॥ गंधमादन इति पुल्लिंगोप्यन्यत्र॥ स्या
द्गंधमादनो भृंगे गंधके वानरांतरे॥ स्त्रीसारायां न ... स्त्रीति मेदिनी॥" ३॥ पाषाणः॥ प्रस्तरः॥ ग्रावा॥ उपलः॥ अ
श्मा॥ शिला॥ दृषत्॥ सप्त पाषाणस्य॥ शिलादृषदौ स्त्रियां॥ कूटः॥ शिखरं॥ शृंगं॥ त्रयमपि पुंनपुंसकलिंगं पर्वताग्रस्य॥"
अत्र स्त्रीति पूर्वोत्तराभ्यां संबध्यते। शिखरवाची शृंगशब्दः क्लीब एव दृश्यते॥" प्रपातः॥ अतटः॥ भृगुः॥ त्रयं पर्वतासन्न
स्थनस्य॥ प्रपतत्यस्मिन् प्रपातः॥ ना विद्यते तटोऽत्रेत्यतटः॥ "प्रपातस्तु तटो भृगुरित्यपि पाठः॥ तत्र प्रपसतेयतः

Joint project of Rajwade Sanshodhan Mandal, Dhule and Yashwantrao Chavan ... Mumbai

अ० टी० स्तटात् सततो भ्रगुरिति ॥१४॥ अद्रेर्नितंबो मध्यभागः कटक इत्युच्यते ॥ एकं स्नुः प्रस्थः । सानुः । त्रीणि पुंनपुंसकलिं कं०
८ गानि समभूभागपर्वतैकदेशे ॥ तत्र स्नुः पुमानेवेति सर्वधरः । स्नौति प्रस्रवं संभ स्नुः । प्रतिष्ठंते ऽस्मिन् प्रस्थः ।
सनोति ददाति सुखं सानुः । उत्सः । प्रस्रवणं । द्वे यत्र पानीयं निपत्य बहुली भवति तस्य स्थानस्य । प्रस्रवत्यस्मिं
(४) प्रस्रवणं । वारिप्रवाहः । निर्झरः । झरः । "झरो दैर्घ्याद्धिकश्चापतु षित्वादुङ् झरा । अचई झरिः ङी झरी च"
त्रीणि झरा इति ख्यातस्य । पंचापि पर्यायाः इत्यन्ये ॥१५॥ दरी कंदरः । द्वे पर्वतस्य गुहाकारस्य कृत्रिमविवरस्य ।
पक्षे कंदरा । कंदरी त्यपि ॥ गुहा । गह्वरं । द्वे देवखाते अकृत्रिमे बिले बिलविषये । केचिद्देवखातादपि पर्यायचतु
ष्टयमाहुः । यत्कासः । देवखातं बिलं गुहा ति गह्वरं बिलं दंभयोः इति च । केचित्तु । सूक्ष्मस्थूलभेदेन द्वाभ्यां
द्वाभ्यां भेदमाहुः । "गिरेः सकाशाच्युताः पतिता ये स्थूलपाषाणास्ते गंडशैला इत्युच्यंते । "गिरेस्तिर्यक्
प्रदेशाद्वा हानिं गताः स्थूलाकारपाषाणास्ते दंताका इत्येकं ॥१६॥ खनिः । "खनी । खनिः । खनिरेवमता ८
खानीरिति द्विरूपकोशः ।" आकरः । द्वे रत्नाद्युत्पत्तिस्थानस्य खाण इति ख्यातस्य ॥ पादाः । प्रत्यंतपर्वताः ॥

(8A)

द्वेपर्वतसमीपस्थाल्पपर्वतानां। अद्रेरधःसंनिहिता भूमिरुपत्यकेत्युच्यते। एकं। अद्रेरूर्ध्वा या भूमिः साऽधित्यका। एकं॥७॥
अद्रेर्यन्मनःशिलादि सा धातुरित्युच्यते। आदिना हरितालस्वर्णताम्रादिग्रहः। "तदुक्तं॥ सुवर्णरौप्यताम्राणि हरि
तालं मनःशिला॥ गैरिकाञ्जनकासीससीससलोहाः सहिंगुलाः। गंधकोऽभ्रमइत्याद्या धातवो गिरिसंभवा इति॥" गैरि
कं विशेषतो धातुः इत्येव प्रसिद्धमित्यर्थः। एकं। गेरू। "क्लावे॥" इति ख्यातस्य॥ निकुंजः। कुंजः। द्वे लतादिपिहितोदरे
लताद्याच्छादितगर्भे छादितगर्भे स्थाने। "विकल्पेन द्वे क्लीबे अपि॥" आदिना तृणादिग्रहः॥८॥ ॥ इति शैलवर्गः॥ ॥
अटवी। अरण्यं। विपिनं। गहनं। काननं। वनं। षट् अरण्यस्य। तत्राटवी स्त्रियां। "कृदिकारादिति ङीषि तेनान्यत्राटवि
रित्यपि॥" महारण्यम् अरण्यानी द्वे महतो वनस्य। अरण्यानी स्त्रियां। गृहारामाः निष्कुटाः द्वे गृहसमीपकृत्रिमवनेषु "
कुटात् गृहान्निष्क्रान्ता निष्कुटाः॥९॥ यत्कृत्रिमं हस्तारोपितं वनं तत् आरामः। उपवनं इति द्वे। वृक्षवाटिकेत्येकं अमात्यानां वेश्या
नां च गृहोपवनं तत्र॥२॥ यत्राशेषैः साधारणं प्रमदाभिरन्यैर्वा सह क्रीडाद्यर्थं वनं तत्र आक्रीडः। उद्यानमिति द्वे। "ज्ञेयमा
क्रीड उद्यानमित्यमरमालायामाक्रीडस्यापि क्लीबत्वमुक्तं॥" एतदुद्यानं अंतःपुरोचितं राज्ञीनामेव क्रीडायामुचितं चेत्
प्रमदवनं स्यात्। ङ्यापोः संज्ञाछंदसोरिति ह्रस्वः। एकं॥३॥ वीथी। "ङीषो विकल्पादन्यत्र वीथिरित्यपि॥" आलिः। अव
लिः। पंक्तिः। श्रेणी। पंच पंक्तेः। "आल्यादित्रीणि इकारान्तानि दीर्घान्तान्यपि। श्रेणी ह्रस्वान्ताऽपि॥" लेखा। "रेखा॥" राजयः

Rajwade Sanshodhan Mandal, Dhule and the

अ० १८० द्विलेखानां संततिः पंक्तिः॥ "निरंतरालेखा यथा विप्रपंक्तिः॥" भस्मलेखा वनानां समूहे वन्ये सेकं। अभिनवोद्भिदनुतान को०
८॥ प्ररोहे अंकुर इत्येकं। "अंकुरः अंकूरः श्वांकुरः प्रोक्त इति हलायुधः॥" ॥४॥ वृक्षः महीरुहः शाखी विटपी पादपः तरुः
अनोकहः कुटः शालः "सालः सालः सर्जतरौ वृक्षमात्रप्राकारयोरपीति। सालः पादपमात्रे स्यात्प्राकारे इति मेदिनी॥ वि
(१) श्वप्रकाशे॥" पलाशी॥ द्रुः॥ द्रुमः॥ अगमः त्रयोदश वृक्षस्य। पुष्पाज्जातैः फलै रुपलक्षितो वृक्षो वानस्पत्यः एकं आम्रादेः। अपु
ष्पात् पुष्पं विना जातैः फलै रुपलक्षितो वृक्षो वनस्पतिः एकं पनसोदुंबरादेः। द्रुममात्रेऽपि वनस्पतिः। "वनस्पतिर्विना द्रुमात्रे
विना पुष्पं फलि द्रुमे इति मेदिनीकोशात्॥" फलपाकरवान्तो या सा ता ओषध्यः स्युः एकं व्रीहियवादेः। "ओषधिः फलपाकांता
स्यादिति वा पाठः। ङीषि ओषधी। इन्नि ओषधिः॥" अवंध्यः "अबंध्यः॥" फलेग्रहिः द्वयं यथाकालं फलधरस्य॥६॥ बंध्यः॥"
बंध्यः बंधे साधुः यतः॥" अफलः अवकेशी त्रयं ऋतावपि फलरहितस्य। फलवान् फलिनः फली त्रीणि सफलस्य। फलिनाद्
तः प्रफुल्लः उत्फुल्लः संफुल्लः व्याकोशः "मूर्धन्यांतो वा॥" विकचः स्फुटः॥७॥ फुल्लः एतेऽष्टौ विकसिते पुष्पिते स्युः। अवंध्या
दयः अवंध्योऽफल इत्यादयो विकसितांताः त्रिषु वाच्यलिंगा इत्यर्थः। स्थाणुः ध्रुवः शंकुः त्रीणि छिन्नविटपस्य। प्रकांडे। वाना।
स्थाणुशब्दो विकल्पेन नपुंसीत्यर्थः। "रूपभेदात् क्लीबत्वं। स्थाणुरस्त्रीति वा पाठः। स्थाणुः कीले हरे पुमान्। अस्त्री ध्रुव ६
इति मेदिनी। शाखा प्रसिद्धा। शिखा मूलं वृक्षमूलं। ह्रस्वशाखा शिफा यस्य स क्षुपः इत्युच्यते। एकं॥८॥ न विद्यते प्रकांडो यस्य

(९A)

अरिणा पीड्यमानस्य बलवद्भूपालाद्याश्रयणं आश्रयः। एतेषां भेदास्तु कामंदकीयादौ द्रष्टव्याः॥१८॥ एते संध्यादयः षड्
गुणाः स्युः। एकं प्रभावोत्साहमंत्रजास्तिस्रः शक्तयः स्युः। एकं तत्र कोशदंडजं तेजः प्रभावशक्तिः। विक्रमादिनोन्नतिरुत्सा
हशक्तिः। संधिविग्रहादीनां मंत्रेण यथावत्स्थापनं मंत्रशक्तिः। पंचांगमंत्रो मंत्रशक्तिरित्यन्ये। क्षयः। स्थानं। वृद्धिरिति त्रयं
नीतिवेदिनां त्रिवर्गः स्यात्। नीतिशास्त्रोक्तवर्ग इत्यर्थः। एकं। अष्टवर्गस्यापचयः क्षयः। तस्यैवोपचयो वृद्धिः उपचयापचयरहिते
नावस्थानं स्थानं। अष्टवर्गस्तु कृषिर्वणिक्पथो दुर्गं सेतुः कुंजरबंधनं। खनिर्बलं करादानमित्युक्तः॥१९॥ द्वे। अर्थौघः। दः को
दमः सेना तज्जं यत्तेजः प्रतापः प्रभावश्च स्यात्। द्वे। अधिक्षेपावमानादेः प्रयुक्तस्य परेण यत् प्राणात्ययेऽप्यसहनं तत्तेजः समु
दाहृतमिति भरतः साम प्रियवचनादि तदुक्तं। परस्परोपकाराणां दर्शनं गुणकीर्तनं। संबंधस्य समाख्यानमायत्याः संप्रकाश
नं। वाचा पेशलया साधु तवाहमिति चार्पणं। इति सामविधानज्ञैः साम पंचविधं स्मृतमिति ७ दानं धनादेः समर्पणं भेदः संह
तानां शत्रूणां भेदनेनात्मनः सौख्यकारणं बलादीनां दंडनं दंडः। एते अतुष्क उपायचतुष्टयं स्यात् ८ अन्यत्तु पायाः प्रकी
र्तिताः॥२०॥ साहसं। दमः। दंडः। त्रीणि दंडस्य। साम। सान्त्वं। द्वे समौ तुल्यार्थौ इति स्यात् तस्य ७ भेदः। उपजापः। द्वे संहतयोर्द्वैधीकरण
स्य। धर्मार्थकामैर्भयेन च परीक्षणं। अमात्यादिनामाशयान्वेषणं उपधा स्यात्। तद्यथा। भवज्ञानाय राज्ञा प्रेरितेनाप्तेन दु
ष्टोयं राजा तदेनमुत्सृज्यान्यमभिषेचयामोऽन्यं वा साधुं नृपं ब्रजाम इत्युक्तौ अमात्यादिर्यदि तद्दूषणं न मन्यते तर्हि स संधा

र्निकोय मिति निश्चयो धर्मपरीक्षणं। एवमर्थपरीक्षणादिबुध्योदाहर्तव्य। एकं॥ २१॥ अथ षडुक्षीणां दिनिःशलाकांताः पुंचत्रा
(१०) क्ताः त्रिषु वाच्यलिंगाः। यस्तृतीयाद्यगोचरः तृतीयादिना न ज्ञायते किं तु द्वाभ्यामेव क्रियते स मंत्रादिः षडुक्षीण इत्येकं।
विविक्तः। विजनः। छन्नः। निःशलाकः। रहः॥ २२॥ रहः। उपांशु। सप्त विजनस्य। तत्रैकं रहः सा ... तं क्लीबं। द्वितीयं रहः उह
ह उपांशु इति च द्वे अलिंगे। अव्यये इत्यर्थः। तद्भवे रहो भवे रहस्यं मित्येकं। विस्रंभः। "तालव्यमध्योपि। विश्रंभ केलिकलहे विश्वा
सेप्रणयेपि चेति मेदिनी। "विश्वासः। द्वे। यथोचितात् स्वरूपाद्भ्रंशः पतनं भ्रेषः इत्येकं॥ २३॥ अभ्रेषः। न्यायः। कल्पः। देश
रूपं। समंजसं। पंच कंनीतेः। "प्रशस्तदेशानं देशरूपं। प्रशंसायां रूपप्" युक्तं। औपयिकं। लभ्यं। भजमानं। अभिनीतं॥ २४॥
न्याय्यं षट्। न्यायादनपेतस्य द्रव्यादेः। अभिनीतवदिति वत् ... युक्तादीनां पर्यायत्वद्योतनार्थः। एते षड् वित्रिषु। संप्रधा
रणा। समर्थनं। द्वे युक्तायुक्त परीक्षायाः। अववादः। निर्देशः। निदेशः। शासनं॥ २५॥ शिष्टिः। आज्ञा। षट् कर्म ज्ञापनस्य
सं स्य। "कार्यमकर्तव्यवदनमात्रावादः।" संस्था। मर्यादा। धारणा। स्थितिः। चत्वारि न्याय्यमार्गस्थितेः। आगः। अपराधः। म
न्तुः। त्रीणि अपराधस्य। आगः सांतं क्लीबे। मंतुः पुंसि। उद्दानं। बंधनं द्वे बधनस्य॥ २६॥ द्विगुणो दंडो द्विपाद्यः स्यात्
एकं। "दोपादोपरिमाणस्य द्विपाद्यः।" भागधेयः। करः। बलिः। त्रीणि कर्षकादिभ्यो राजग्राह्यभागस्य।" धारा

पट्टीबरूरल इति ख्यातस्य। भागरूपधेयः भागधेयः।" घट्टो नदीतीरादिस्थानं कट्टा इति ख्यातं। आदिना गुल्मादि। तत्र
(१७) पट्टे यन्नेतव्यानेतव्यवस्तुसंबंधी राजग्राह्यो भागः स शुल्कः स्यात्। त्रिमध्योयं। एकं। "जकात इति ख्यातस्य क्लीबे शुल्कं।"
प्राभृतानां भेदेऽग्रांतं॥२७॥ उपायनं। उपग्राह्यं। उपहारः। उपदा। षट् नृपगुर्वादिदर्शनादौ समर्प्यमाणस्य वस्तुनः। तत्रोपदा स्त्रि-
यां। युतकयोर्वधूवरयोरिदं यौतकं आदिना बंधुदेयादि यद्देयं तत् सुदायः हरणं च स्यात्। द्वे। "कन्यादानकाले प्रतिभिक्षा दो
यदीयमानद्रव्यस्य। यौतुकमपि। यौतकं यौतुकं च तद् इति वाचस्पतिः।" सुदायः पुंसि॥२८॥ तत्कालस्तु तदात्वं। द्वे "वर्तमा
नकालस्य।" स चासौ कालश्चेति तत्कालः। उत्तरआगामी कालः आयतिः स्यात्। एकं। स्त्री। यत्सद्यः फलं तत् सांदृष्टिकं। एकं। उत्तरं भा
वि फलं उदर्कः स्यात्। एकं॥२९॥ वह्निरग्न्युत्पातः तोयमतिवृष्ट्यादि यद्भयं तत् भयं इति सेकं। "आदिना हूनाग्न्यो ज्वलं व्याधि
दुर्भिक्षणं तथा। अतिवृष्टिरनावृष्टिर्मूषकाः शलभादयोऽन्यच्चेते।" स्वपरराष्ट्रजन्यं चोरादिभयं यत् तद् डिंबं। एकं। राज्ञां स्वप
क्षप्रभवं स्वसहायजन्यं भयं अहिभयं स्यात्। एकं॥३०॥ प्रक्रिया। अधिकारः। द्वे व्यजवस्थास्थापनस्य। चामरं। "चमरमपि
चामरे स्त्री तु मंजरीमृगभेदयोरिति मेदिनी॥ चामरा चामरे बालव्यजने रोमगुच्छके इति रभसः।" प्रकीर्णकं। द्वे "चवरी इति
ख्यातस्य।" नृपासनं। भद्रासनं। द्वे मण्यादिकृतराजासनस्य। तत् पासनं स्वर्णनिर्मितं चेत् सिंहासनं स्यात्। एकं॥३१॥

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com